# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमद्भागवते नवमस्कन्धः मार्कण्डेयपुराणे च 79-91 अध्यायाः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।**

१ भगवञ्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः।
न प्राभूद् यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः॥

२ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने।
कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः॥

३ त्वमग्निर्भगवान्सूर्यस्त्वं सोमो ज्योतिषां पतिः।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च॥

**प्रश्नः २ नाभागाम्बरीषयोः चरित्रम् उपपादयत।**

**प्रश्नः ३ भगीरथचरित्रं गङ्गावतरणकथां च वर्णयत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या।**

१ अथातः श्रूयतां राजन् वंशः सोमस्य पावनः।
यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः॥

२ स्वागतं ते वरारोहे आस्यतां करवाम किम्।
संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः॥

३ को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान्।
प्रतिकर्तुं क्षमो यस्य प्रसादाद् विन्दते परम्॥

**प्रश्नः ५ भरतवंशवर्णनं रन्तिदेवस्य च कथामुपपादयत।**

**प्रश्नः ६ परशुरामेण कृतः क्षत्रियसंहारः वर्णनीयः।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या।**

१ एतद्वः कथितं सर्वममरारिविचेष्टितम्।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम्॥

२ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता॥

३ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

**प्रश्नः ८ देव्या सुरथ-वैश्याभ्यां प्रदत्तं वरदानं दर्शयत।**

**प्रश्नः ९ देव्या कृतां नैकदैत्यसंहारलीलां वर्णयत।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत।**

१ नवमस्कन्धे कति अध्यायाः ?
२ राजर्षिर्द्रविडेश्वरः अर्थात् कः ?
३ इलां सुद्युम्नं कः कारयामास ?
४ वसिष्ठः गोसेवायां कं नियुक्तवान् ?
५ नाभागस्य भागे सम्पत्तौ किमागतम् ?
६ आङ्गिरसगोत्रजैः ब्राह्मणैः यज्ञावशिष्टं धनं कस्मै दत्तम् ?
७ अतुलैश्वर्यं स्वप्नवत् कः मनुते ?
८ अम्बरीषः कस्मिन् मासि त्रिरात्रमुपवासमकरोत् ?
९ साधवो हृदयं मह्यमिति कः ब्रूते ?
१० अश्विनीकुमारौ कस्मै महर्षये यौवनं दत्तवन्तौ ?
११ देव्याः वार्षिकी महापूजा कदा क्रियते ?
१२ केषां पुंसां कुलं नन्दते ?
१३ वने सुरथः कस्याश्रममद्राक्षीत् ?
१४ कः देवीसूक्तं जपन् तपस्तेपे ?
१५ मार्कण्डेयपुराणे कति श्लोकाः सन्ति ?

****